# SANSKRIT

**(Code No. 303)**

## Class X

नवमदषमश्रेणीभ्याम् संस्कृतभाषायाः प्रभाविशिक्षणार्थ विकसितः सम्प्रेषण–उपागम–आधारितः द्विवर्षीयः एषः पाठ्यक्रमः। प्रायः अनुवादमाध्यमेन एव संस्कृतशिक्षणं प्रवर्तते येन छात्रेषु भाषागतकौशलानां सम्यक् विकासः न भवति। अतः छात्रशिक्षकमध्ये कक्षासु संस्कृतभाषायाम् अन्तः क्रिया भवेत् येन छात्राः–

- संस्कृतभाषायां श्रवणावसरं लभेरन्ः
- सरलसंस्कृतवाक्यानि श्रुत्वा अर्थम् अवगच्छेयुः
- कक्षासु सामान्यव्यवहारे निपुणाः भवेयुः
- संस्कृतगद्यस्य पद्यस्य च मौनवाचने सस्वर–शुद्ध–उच्चारणे च सक्षमाः भवेयुः
- निर्दिष्टशब्दूसचीसाहाय्येन सरलसंस्कृतवाक्येषु अनुच्छेदलेखने, पत्रलेखने योग्यतां धारयेयुः इति एतानि पाठ्यक्रमस्य लक्ष्याणि।

सारांशतः संस्कृतेन श्रवण–भाषण–वाचन लेखनकौशलानां विकासः अपेक्ष्यते। छात्राः केवल कण्ठस्थीकरणं न कुर्युः अपितु चिन्तनप्रेरकप्रश्नानां माध्यमेन तेषां मौलिकसर्जनात्मकशक्तेरपि विकासः भवेत् इति आशास्यते।

## विशिष्टोद्देश्यानि

**श्रवणं च भाषणम्**

- छात्राः कक्षासु शिटाचारपालने संस्कृतस्य प्रयोगं कुर्युः,
- सरलनिर्देशान् श्रुत्वा तदनुसारं कार्यं कुर्युः,
- कक्षाव्यवहारे संस्कृतेन अनुमतिं प्राप्नुयुः,
- सरलसंस्कृते प्रश्ननिर्माणे समर्थाः भवेयुः,
- सरलसंस्कृतप्रश्नानां मौखिकरूपेण एकपदेन पूर्णवाक्येन वा उत्तराणि वक्तुं समर्थाः भवेयुः
- वर्णानामः उच्चारणं श्रुत्वा उच्चारणस्थनां जानीयुः,
- सरलसंस्कृतवाक्येषु भावप्रकटनसार्म्य शुद्धवाक्यसरंचनाप्रावीणयं वा गृह्णीयुः।

## वाचनम्

वाचनस्य अन्तर्गते छात्रेषु अधोलिखिताः दक्षताः अपेक्ष्यन्ते –

- प्रदत्तगद्यांशस्य पद्यांशस्य नाट्यांशस्य च मौनवाचनं, सस्वरवाचनम् अथ च भावपूर्णवाचनम्ः
- गद्य–पद्य–नाट्यदिपाठ्यवस्तु पठित्वा भावबोधनम्ः,
- सरलवाक्यानि पठित्वा पद–विशेषम् आधृत्य प्रश्ननिर्माणम्ः
- पाठ्यांशमधिकृत्य शीर्षकप्रदानम्ः

- पद्यानाम् अन्वयेषु समुचिशब्दैः रिक्तस्थानपूर्तिः
- पद्यानाम् प्रदत्तभावार्थेषु रिक्तस्थानपूर्तिः
- क्रमरहितवाक्यानि पठित्वा मौखिकरूपेण क्रमनिर्धारणम्ः

## लेखनम्

लेखनमधिकृत्य अघोलिखिताः दक्षताः अपेक्षिताः–

- देवनागरीलिपिज्ञानम्, संयुक्तव्य्ज्नलेखनम्, स्वरव्य्जनसंयोगेन शब्दनिर्माणम्, शब्दानां, वर्णविन्यासः,
- वाक्येषु प्रातिपदिकानां सविभक्तिप्रयोगः
- कर्तृपदैः सह क्रियायाः अन्वितिः
- विशेषण–विशेष्यपदानाम् अन्वितिः
- कृत्–तद्धितप्रत्ययानां सहायतया वाक्यनिर्माणम्ः
- कथनमाधृत्य प्रश्नलेखनम्ः
- अव्ययानां सार्थकशुद्धप्रयोगः
- विरामचिह्नानां समुचितप्रयोगः
- घटनाक्रमानुसारम् अनुच्छेदस्य लेखनं, कथालेखनं पत्रादिलेखनं चः
- प्रदत्तसूचीसाहाय्येन प्रश्ननिर्माणम्ः
- अथ्भनन्दन–निमंत्रण–वर्धापनपत्राणं निर्माणं, प्राचार्यं प्रति च प्रार्थनापत्रलेखनम्ः
- प्रदत्तवार्तालापे रिक्तस्थानपूरणम्।

**गतिविधियः**

- संस्कृतस्य समानान्तरसूक्तीनां सुभाषितानां संग्रहणम् प्रदर्शनच्च।
- विविधप्रतियोगितानाम् आयोजनं श् लोकोच्चारणम्, कथोपकथनं भाषणं, नाट्यांशनाम् अभिनयश्च
- संस्कृतभाषावाक्यप्रयोगमाश्रित्य विविधक्रीडासु प्रतिभागित्वम्।
- शब्दकोशस्य प्रयोगे नैपुण्यविकासय छात्राणं स्वकीयशब्दकोशनिर्माणम्।
- विविध–अवसरेषु प्रयोगार्थम् अभिनन्दन–निमंत्रण–वर्धापनपत्राणं निर्माणम्।
- संस्कृतभाषायं मित्तिपत्रिकासम्पादनम्।
- विद्यालयस्य पत्रिकायां संस्कृतविभागस्य योगदानम्।
- छात्रैः कृतस्य कार्यस्य प्रदर्शनी–आयोजनम्।
- संस्कृतवाचनम् अधिकृत्य ध्वनिपट्टिकानां निर्माणम्।

## मूल्यांकनम्

छात्राः कक्षासु संस्कृतभाषायाः सम्यम् प्रयोगं कुर्युः। अतः तेषां वाग्व्यवहारस्य वाचनस्य पठनस्य लेखनस्य च सततं व्यापकं मूल्यांकनमपेक्ष्यते। यद्यपि वार्षिक–बोर्ड–परीक्षासु प्रायः पठन–लेखनकौशलयोः एव परीक्षणं भवति

किन्तु अनयोः कौशलयोः आधारभूते तु श्रवण—भाषणे एव स्तः। अतः एते कौशले उपेक्षां न अर्हतः। एतदर्थ संस्कृतं संस्कृतेनैव शिक्षणीयं येनछात्राः सम्यक् श्रवणावसरंभाषणावसरंच ल भेरन्। कक्षासु संस्कृत परकगतिविधीनाम् आयोनम्अ पिअवशयकंयेन छात्रेषु चिन्तनक्षमतायाः विकासः भवेत्। अतः अधोलिखितं सततं व्यापकं मूल्यांकनम् अपेक्ष्यते –

## दशमी कक्षा

**एकं प्रश्नपत्रम्** **अवधि :** **पूर्णांका - 100**

| | | | |
|---|---|---|---|
| क खण्ड : | (अपठितःअवबोधनम्) | 15 | अंकाः |
| ख खण्ड : | (रचनात्मकं कार्यम्) | 20 | अंकाः |
| ग खण्ड : | (अनुप्रयुक्त—व्याकरणम्) | 30 | अंकाः |
| घ खण्ड : | (पठित—अवबोधनम्) | 35 | अंकाः |

## 'क' खण्ड : (रचनात्मकंकार्यम्)

### (मणिका-अभ्यासपुस्तकम्-II आधारितम्)

1. 40—50 शब्दपरिमितः गद्यांशः (एकः सरलगद्यांशः) 5 अंका :
   - प्रश्नोत्तराणि (3)
   - भाषिककार्यम् (2)

2. 80—100 शब्दपरिमितः गद्यांशः, एकः सरलगद्यांशः 10 अंकाः
   (सरलकथा – घटनावर्णनम् वा)
   - प्रश्नोत्तराणि
   - समुचित शीर्षकप्रदानम् (6)
   - भाषिककार्यम् (2)

   (i) वाक्येक तृक्रियापदचयनम्

   (ii) कर्तृक्रिया—अन्वितिः

   (iii) विशेषणविशेष्य—अन्वितिः

   (iv) संज्ञास्थाने सर्वनामप्रयोगः अथवा सर्वनामस्थाने संज्ञाप्रयोगः

   (v) पर्यायं विलोमं वा पदं दत्त्वा अनुच्छेदे दत्तं पदचयनम्।

## 'ख' खण्ड : (रचनात्मकंकार्यम्)

### (मणिका-अभ्यासपुस्तकम्-II आधारितम्) 20 अंका :

**3. संकेताधारितम् अनौपचारिकपत्रम्** **5 अंका :**

**4. संकेताधारितं संवादलेखनम्** **5 अंका :**

**5. चित्रधारितम् वर्णनम् अथवा संकेताधारितम् अनुच्छेद-लेखनम्** **10 अंका :**

NATIONAL BOARD OF SCHOOL EDUCATION राष्ट्रीय स्कूल शिक्षा बोर्ड तमसो मा ज्योतिर्गमय

## 'ग' खण्ड : (अनुप्रयुक्त-व्याकरणम्)

**(मणिका-अभ्यासपुस्तकम्-II आधारितम्)** **30 अंका :**

**6. सन्धिकार्यम्**

- स्वरसन्धिः – दीर्घ, गुण, वृद्धि, यण्, अयादि, पूर्वरूपम्। (1)
- व्यंजनसन्धिः – परसवर्णं, छत्वं, तुक्–आगमः, मोनुस्वरः वर्गीयप्रथमाक्षराणां (1)
- तृतीयवर्णपरिवर्तनम्, प्रामिवर्णस्य पंचमवर्णें परिवर्तनम्।
- विसर्गसन्धिः विसर्गस्य उत्वं, रत्वं, लोपः विसर्गस्थने स्, श्, ष् (1)

**7. समासः (वाक्येषु समस्तपदानां विग्रहः विग्रहपदानां च समासः)** **4 अंका :**

- तत्वपुरूषः (विभक्ति, नत्र, उपपदः) (1)
- कर्मधारयः (विशेषण–विशेष्यम्, उपमान–उपमेयम्)
- द्विगुः
- द्वन्द्वः (1)
- बहुव्रीहिः सामानाधिकरणम् (1)
- अव्ययीभावः (अनु, उप, सह, निर्, प्रति, यथा) (1)

**8. प्रत्ययाः** **5 अंका :**

- अधोलिखित–प्रत्यययोगैः, वाक्यसंयोनजम्, रिक्तस्थानपूर्तिः–
- कृदन्ताः तव्यत्, अनीयर्, शतृ, शानच् (2)
- तद्धिताः मतुप, इन्, ठक्, त्व, तल्। (2)
- स्त्रीप्रत्ययौ टाप्, ङीप्। (1)

**9. अव्ययपदानि (कथायाम् अनुच्छेदे संवादे वा अव्ययानां प्रयोगः)** **5 अंकाः**

अपि, इति, इव, उच्चैः, एव, कदा, कुतः, नूनम्, पुरा, मा, इतस्ततः, यत्, अत्र–तत्र, यत्र–कुत्र, इदानीम, सम्प्रति यदा–कदा, यथा–तथा, यावत्–तावत्, दिना, सहसा, श्वः, ह्यः, अधुना, बहिः, वृथा, कदापि, शनैः, किमर्थम्।

**10. वाच्यपरिवर्तनम् (केवलं लट्लकारे)** **3 अंकाः**

**11. घटिकाचित्रसाहायूयेन अङ्कानां स्थाने शब्देषु समय-लेखनम्** **4 अंकाः**

सामान्य–सपाद–सार्ध–पादोन

**12. सङ्ख्या एकतः पच्चपर्यन्तं वाक्यप्रयोगः। एकतः शतपर्यन्तं संख्याज्ञानम्** **2 अंकाः**

**13. वचन-लिङ.ग-पुरुष-लकार-दृष्ट्या संशोधनम्** **4 अंकाः**

**(मणिका-अभ्यासपुस्तकम्-II आधारितम्)** **35 अंका :**

## ‘घ’ खण्डः (पठितः अवबोधनम्)

**14. पठित सामग्रीम आधृत्य अवबोधनमकार्यम्**

अ. एकः गद्यांशः (1 + 2 + 2) (5 अंकाः)

आ. एकः पद्यांशः (1 + 2 + 2) (5 अंकाः)

इ. एकः नाट्यांशः (1 + 2 + 2) (5 अंकाः)

- प्रति–अंशम् आधारितम् अवबोधनकार्यम् (1 + 2) (3 अंकाः)
  प्रश्नोत्तराणि, रिक्तस्थानपूर्तिः
- भाषिककार्यम् (2 अंकौ)
  - (i) वाक्ये कर्तृक्रियापदचयनम्
  - (ii) कर्तृक्रिया – अन्वितिः
  - (iii) विशेषणविशेष्य–अन्वितिः
  - (iv) संज्ञास्थाने सर्वनामप्रयोगः अथवा सर्वनामस्थाने संज्ञाप्रयोगः
  - (v) पर्यायं विलोमं वा पदं दत्वा अनुच्छेदे दत्तं पदचयनम्।
  - (vi) विशेषण–विशेष्यचयनम्, कर्तृक्रियाचयनम्

**15. भावाबोधनम् (अंशद्वयम्)** **3 + 3 अंकाः**

(रिक्तस्थानपूर्तिद्वारा, विकल्पचयनेन, शुद्ध–अशुद्धमाध्यमेन, समभावसूक्तिमाध्यमेन वा)

**16. अन्वये रिक्तस्थानपूर्तिः** **1 + 2 = 3 अंकाः**

**17. प्रश्ननिर्माणम् (चत्वारः)** **4 अंकाः**

**18. क्रमरहित-अष्टवाक्यानां कथाक्रमसंयोजनम् कथापूर्तिः वा** **4 अंकाः**

**19. सन्दर्भ-शब्दानां प्रयोगः शब्दार्थ-मेलनम् वा** **3 अंकाः**

**पाठ्यसामग्री**

1. मणिका (पाठ्यपुस्तकम्) भागः – 2 संशोधित संस्करणम् ¼d-ek-f'k-ck- }kjk i!dkf'kre½
2. मणिका (अभ्यासपुस्तकम्) भागः – 2 संशोधित संस्करणम् ¼d-ek-f'k-ck- }kjk i!dkf'kre½

NATIONAL BOARD OF SCHOOL EDUCATION
राष्ट्रीय स्कूल शिक्षा बोर्ड
तमसो मा ज्योतिर्गमय